# पञ्चमोऽध्यायः

- स्वामिनारायणभाष्यमाश्रित्य निरोधपरिणामपर्यालोचनम्।
- समाधिपरिणामस्य स्वरूपपर्यालोचनम्।
- पातञ्जलयोगदर्शनस्य समस्तटीकामाश्रित्य एकाग्रतापरिणाम-पर्यालोचनम्।
- अनागतज्ञानस्य प्रयोजकत्वविमर्शः।

# पञ्चमोऽध्याय:

## स्वामिनारायणभाष्यमाश्रित्य निरोधपरिणामपर्यालोचनम् -

निरोधपरिणामविषये श्रीकृष्णवल्लभाचार्य: स्वकीये भाष्ये निगदितम्। चित्तस्य पञ्च भूमय: तासु पञ्चभूमिसु क्षिप्तमूढविक्षिप्तान् चित्तस्य व्युत्थानं कथ्यते। निरोधो नाम पञ्चमी चित्तभूमि: अर्थात् प्रकृष्टसत्त्वस्याऽङ्गितया चेतस: परिणाम इति ताभ्यां व्युत्थाननिरोधाभ्यां जनितौ यौ संस्कारौ तयोर्यथाक्रमम् अभिभवप्रादुर्भावौ यदा भवत:, तदा निरोधक्षणे चित्तस्याऽन्वयो भवति स: निरोधपरिणाम इति स्वीक्रियते।[306]

महर्षिपतञ्जलिना योगसूत्रे प्रतिपादितमस्ति यत् निरोधक्षणे व्युत्थानसंस्कारस्य अभिभव:, निरोधसंस्कारस्य प्रादुर्भावो भवति अत: तस्मिन् काले चित्ते निरोधपरिणाम: विद्यमानो भवतीति।

**व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणाम:।**[307]

तासु व्युत्थानभूमिकायां निरुपणं श्रीकृष्णवल्लभाचार्येण प्रस्तुतम् -

---

306 योगदर्शनस्वामिनारायणभाष्यम् पृ. 270

307 पातञ्जलयोगसूत्रम् 3/9

**क्षिप्तम्** -

अस्याम् अवस्थायां रजोगुणं प्रधानो भवति, तस्य कारणं राग-द्वेषौ स्तः। क्षिप्ते चित्ते सति प्रमाणविपर्ययविकल्पाऽभिधाना जाग्रद् वृत्तयो भवन्ति।

**मूढम्** -

अस्याम् अवस्थायां निद्रा-तन्द्रा-भय-मैथुन-मोह-आलस्य-दैन्यादिषु मनुष्यानां प्रवृत्तिर्भवति, अस्य कारणं काम-क्रोध-लोभ-मोहश्चास्ति। अत्र तमोगुणस्य प्रधानता भवति अस्याम् अवस्थायां प्रधाना निद्रा वृत्तिरनुवर्त्तते।

**विक्षिप्तम्** -

अस्यामअवस्थायां ज्ञान-धर्म-वैराग्य-ऐश्वर्यादिषु प्रवृत्तिर्भवति। चित्ते प्रसन्नता-क्षमा-धैर्य-दान-दया-ओजस च पश्यति। अस्याम् अवस्थायां प्रधानता तु सत्त्वगुणस्य भवति परन्तु अनया सह रजोगुणमपि स्वकार्यं करोति, येन चित्ते विक्षेपो भवति, अतएव विक्षिप्त अवस्था कथ्यते। अत्र प्रमाणविपर्ययविकल्पस्मृतयो भवन्ति। अत्र व्याधिस्त्यानसंशयप्रमादाऽलस्याऽविरतिभ्रान्तिदर्शनाऽलब्धभूमिकत्वादयचित्तविक्षेपा अत्र वर्त्तन्ते एव।

**एकाग्रम्** -

रजोतमोगुणयोः विक्षेपः स्थिरो भवति वृत्तीनाञ्च प्रवाहः एकस्मिनैव दिशायां प्रचलति अतएव अवस्था एकाग्रावस्था कथ्यते। अस्याम् अवस्थायां पूर्वे अनुभूत बाह्यविषयाणां संस्कारः स्थिरं भवति, येन साधकं अणुपरमाणुतः महत्तत्त्व पर्यन्तं

ग्राह्य–ग्रहणं–गृहीता समस्त विषयानां साक्षात्कारं करोति। अत्र रजोस्तमोवृत्तीनां विरहाद् व्याध्यादयो दु:खादयश्च तिरोभूता: सन्तो विलुप्ता भवन्ति न तु वर्त्तन्ते। अत: एतत्काले यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिसंज्ञकानि योगाङ्गानि सफलानि भवन्ति, अत्रैव च विशुद्धं 'नाऽस्मि–नाहं–न मे' इत्याकारकं तत्त्वज्ञानं भवति, तेन च विवेकख्यातिपरवैराग्यश्चात्रैव सुस्थिरो भवति।

परवैराग्यस्त्रिविध: – यतमानसंज्ञको व्यतिरेकसंज्ञको एकेन्द्रियसंज्ञकश्चेति।

यतमानसंज्ञक: – तत्र विषयेभ्य इन्द्रियवृत्तीनां निरोधार्थमिन्द्रियवृत्तीनां प्रेरकरागादीनां चित्तवर्तिनां परिपाचनाय प्रयत्नो यतमानसंज्ञकवैराग्य:।

व्यतिरेकसंज्ञक: – यत्ने कृते सत्यवशिष्टानां नि:शेषतयाऽपक्वानां पुन: पचनाय प्रयत्नो व्यतिरेकसंज्ञकवैराग्य:।

एकेन्द्रियसंज्ञक: – चित्तकषायरागादीनां लये सतीन्द्रियवृत्तीनां लयो मनोमात्रेणोत्सुकता स एकेन्द्रियसंज्ञकवैराग्य इति।

अत्रैवैकाग्रे चित्तेऽविद्याऽस्मितारागद्वेषाऽभिनिवेशात्मका: क्लेशा: क्षयं प्राप्ता: कारणात्मका: सूक्ष्मा भवन्ति, कर्माणि जात्यायुर्भोगप्रदानि धर्माऽधर्मात्मकान्यपि क्षीणानि कारणात्मकानि लयं गतानीव भवन्ति, ते क्लेशा: कर्माणि च बीजभावतयाऽवतिष्ठन्ते, ननु जात्यायुर्भोगात्मक कानिनवान्यङ्कुराणि प्रसुवते। अत: सबीजसमाधिरित्यपि उच्यते।[308] अत्र चैकाग्रे चेतसि शुद्धसत्त्वमय्या वृत्ते: सद्भावात्

[308] योगदर्शनस्वामिनारायणभाष्यम् पृ. 18

सम्प्रज्ञायते मनाक् सत्त्ववृत्तिर्यत्रेति व्युत्पत्त्या सम्प्रज्ञातयोग इति ख्यायते। स चायमपरोयोगो बोध्यः, तस्य चत्वारो भेदा एकाग्रे चित्ते एव विद्यन्ते, ते सन्ति - **सवितर्कसम्प्रज्ञातः, सविचारसम्प्रज्ञातः, सानन्दसम्प्रज्ञातः, सास्मितसम्प्रज्ञातश्चेति।**[309]

सवितर्कसम्प्रज्ञातः - तत्रैकाग्रे चित्ते कर्तव्ये प्रथमं स्थूलं पञ्चभौतिकं शरीरं दीपशिखादि भगवतश्चतुर्भुजस्वरूपाऽर्चादिकं वा लक्ष्यीकृत्य तत्रैकतानता स्थूलालम्बनम् सवितर्कसम्प्रज्ञातः।

सविचारसम्प्रज्ञातः - अस्मिन् स्थूलं विहाय सूक्ष्मेन्द्रियतन्मात्रशब्दादिषु लक्ष्यतयाऽऽलम्बनं विधाय चित्तैकाग्रताकरणं सविचारसम्प्रज्ञातः।

सानन्दसम्प्रज्ञातः - इन्द्रियतन्मात्रादिकमपि विहाय तत्कारणीभूतासात्त्विकाहंकारस्थां सत्त्वगुणमात्रां केवलां लक्ष्यीकृत्वा तत्र चित्तैकाग्रताकरणम् सानन्दसम्प्रज्ञातः।

सास्मितसम्प्रज्ञातः - सत्त्वसुखमात्रमपि विहाय तत्कारणीभूतां बुद्धि सम्वित्पदवाच्या-मानात्मना सह संयुक्तां लक्ष्यीकृत्य बुद्धयात्मनोरैकात्म्ये बुद्धिं चेतनप्रतिबिम्बयोः संयोगे सूक्ष्मतरे चित्तैकाग्रताकरणं सास्मितासम्प्रज्ञातरिति।

अयं चतुर्विधो सम्प्रज्ञातयोगो विनाऽऽलम्बन न भवत्यतः सालम्बनसमाधिरिति उच्यते।

---

[309] योगदर्शनस्वामिनारायणभाष्यम् पृ. 18

**निरुद्धम् -**

सत्त्वरजस्तमोमयीनां यावतीनां वृत्तीनां स्वकारणे बुद्धावत्यन्तलयो भवति। तादृशं चित्तं केवला बुद्धिरिति ख्यायते, सा चातीव स्थिरतमा, अत्रैव स्थिरतायाः पराकाष्ठा भवति। साष्टांगस्याऽपरयोगस्य फलमत्रैव परमोयोग इति भवति। अस्यामेवाऽस्थायां बुद्धौ क्षयं गतानां कारणात्मकानामस्मितारागद्वेषाभिनिवेशानां क्लेशानां बीजभावस्य दग्धता भवति, एवं व्याधिस्त्यानादीनां दुःखादीनाञ्चापि क्षयं प्राप्य बुद्धौ कारणात्मकतयाऽवस्थि- तानामन्तरायाणां स्वरूपाण्यपि दग्धानि भवन्ति, अतो निर्बीजसमाधिरिति ख्यायते।[310] एवमत्रैवाऽवस्थायां बुद्धिधर्माणां धर्माऽधर्मादीनां सर्वेषां क्लेशादीनां वृत्त्यादीनाञ्च स्वरूपतो दग्धतया बुद्ध्यादितत्त्वमात्राऽतिरिक्तं असम्प्रज्ञातसमाधिरिति ख्यायते।

निरोधपरिणामस्य फलं दर्शयति श्रीकृष्णवल्लभाचार्यः -

**तस्य प्रशान्तवाहिता संस्कारात्।**[311]

यदा सर्वासां चित्तवृतीनां निरोधो भवति तदा चित्तं प्रशान्तवाहिता सदृशप्रवाहपरिणामिता भवति, एवं च चित्तं स्थिरं शान्तं विशारदो भवति। कथनस्याऽस्य तात्पर्यमिदमस्ति चित्तवृत्तीनां लये सति पुरुषः स्वस्वरूपे स्थितो भवति इति। अनेन क्रमेण निरोधः परिणामः व्याख्यातः।

---

[310] योगदर्शनस्वामिनारायणभाष्यम् पृ. 18-19

[311] योगदर्शनस्वामिनारायणभाष्यम् पृ. 270

**स्वामिनारायणभाष्यमाश्रित्य समाधिपरिणामस्य स्वरूपपर्यालोचनम्।**

समाधे: प्राक् चित्तभूमीनां क्षयोदयो भवति। सर्वार्थता अर्थात् विक्षिप्तता-एकाग्रता एक मात्रविषयता तयो: यथा क्रमं क्षयोदयो चित्तस्य समाधिकालिन परिणामो भवति। सर्वार्थताया: अत्यन्तो भेद एकदा न भवति नापि एकाग्रता वर्त्तते। क्षयनाम तिरोभाव: उदयनाम आविर्भाव: ह्रासवृद्धि:। चित्तं स्वात्मभूतयो: स्वकार्ययो: सवार्थेएकाग्रतयो: धर्मयो: उपायकाल: उपजनकाले चानुगतं यत्समाधीयते स समाधिपरिणाम:। बुद्धिवृत्तीनां सात्त्विकीनां-राजसीनां-तामसीनांप्रमाणविपयर्यविकल्प-निद्रास्मृतय: विधानां स्वकारणे बुद्धितत्त्वे आत्यान्तिकोलय: योग इति उच्यते। बुद्धिवृत्तीनां लयो हि तदेव भवति यदा बुद्धो बीजभावस्तज्ज्ञानाधिना दग्धस्यात्। बुद्धिसंयोगसत्त्वेऽपि तत्र ज्ञानाग्निना दग्धबीजभावत्वाऽवधिकस्तावदपरो योग इति कथ्यते।

गीतायामुक्तो भगवता

**योगस्थ: कुरु कर्माणि सङ्गं त्यक्तवा धनञ्जय।**

**सिद्ध्यसिद्ध्यो: समो भूत्वा समत्वं योग उच्यते।।**[312]

**श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला।**

**समाधावचला बुद्धिस्तदा योगमवाप्स्यसि।।**[313]

---

312 श्रीमद्भागवद्गीता अ. 2/48

313 श्रीमद्भागवद्गीता अ. 2/53

स्वामिनारायणभाष्यानुसारेण यमादीनामनुष्ठाने प्रथममपरो योगः प्रादुर्भवति, तेन च स्वाऽव्यवहितोत्तरकाले एव तत्त्वज्ञानमुत्पद्यते, तेन च विवेकख्यातेर्ध्रौव्ये सति द्रागेव परमो भवति, वैराग्यस्य सध्रीचीनत्वे सति तूर्णमेव भगवद्भक्तिर्भगवछैकतानतात्मिका सम्भवति भक्तेरादिलक्षणपर्यन्तमेवाऽपरो योगः परिभाष्यते। तावदेव जात्यायुर्भोगप्रदक्लेशानां क्षेत्रीभूतायामविद्यायां वासनारूपो बीजभावो भोगाङ्कुरप्रसवं कर्तुं भवति, तत्त्वज्ञानन्तु तथाविधक्लेशानां विरोधि वर्त्तते। सम्यगुत्पद्यमानं सत् क्लेशानां बीजभावं दग्धं करोति, तदा पुरुषः स्वच्छः सात्त्विक्या एव वृत्त्या प्रकृतिं जरन्तीं, पश्यति च, स चायं विवेकख्यातेः क्षणः परमवैराग्यस्यापि क्षणः, विवेकख्यातेर्वैराग्यस्य च सामानाधिकरण्येनैवोपलम्भ्यते, तदेतद्विवेकख्याति-परमवैराग्यश्च संस्थित इति व्यवस्था भवति। भक्तेः प्रथमक्षण-मारभ्योत्तरसमयावच्छिन्नः परमो योगः परमवैराग्यश्चेति विख्यातः। तदेतस्मिन्परमे योगे समुपन्नोऽपि प्रारब्धकर्मणां भोगाय शरीरारम्भकसंस्कारक्षयणाय च धृतिविग्रहः सन् परमो योगे शरीरे तिष्ठति। तत्त्वज्ञाननिरोधेन विलीनाऽखिलक्लेशसलिलायामूषरायां बुद्धिभूमौ दग्धैः कर्मबीजैर्नूतनभोगाङ्कुरस्तु न जन्यत एव, तथा च परमे योगे विद्यमाने सति प्रारब्धभोगानन्तरं शरीरवियोगे युक्तस्तथापि यदीच्छति योगी तथैव भवति, योगिनः प्रारब्धकर्मनाशेऽपि यावदिच्छति तावच्छरीरे मुक्तवत्तिष्ठति, अत एव परमे योगे सत्ययं महायोगी जीवन्मुक्त इति भवति। सेयमवस्था मुक्तेः। परमयोगस्य

साक्षान्मुक्तिं प्रति हेतुत्वमुपपन्नमिति योगाचार्याणां सार्वभौमसिद्धान्तः। अनेन सिद्धान्तेन मोक्षो भवति।

**पातञ्जलयोगदर्शनस्य समस्तटीकामाश्रित्य एकाग्रतापरिणामपर्यालोचनम् –**

महर्षिणा पतञ्जलिना चित्तस्य एकाग्रता विषये प्रतिपादितमस्ति यत् शान्तोदितप्रत्ययोः यदा साम्यावस्थितो भवतः तदा चित्तस्य अवस्था एकाग्रतापरिणाम कथ्यते।

**ततः पुनः शान्तोदितौ तुल्यप्रत्ययो चित्तस्यैकाग्रता परिणामः।**[314]

स्वामिनारायणभाष्ये प्रतिपादितमस्ति – चित्तं शान्तमूढश्च वृत्तिविशेषः एता वृत्तयः यदा तिरोभूता भवन्ति तदा शान्तः व्यपदिश्यते। यदा प्रादूर्भता भवन्ति तदा उदितनाम्ना व्यवह्रियते। तिरोभूतेनाऽत्र स्पष्टीक्रियते यत् या वृत्तयः चित्तं स्वस्थं समाहित सदृशप्रवाह विशारदो भवति ता तिरोभूता, प्रादुर्भूतेऽपि वृत्तिविशेषे स्वस्थमेव चित्तं एकाग्रं य भवति तत् चित्तस्य एकाग्रता परिणाम नाम्ना इत्युच्यते।[315]

वृत्तयः परिणामिनः सर्व एव भावाः सर्वेषामनन्ताः परिणामा भवन्तीति, तत्र प्रत्येकं वस्तु धर्मेण लक्षणेनाऽवस्थया चावच्छिन्नं विद्यते, अतएव धर्मपरिणामेन लक्षणपरिणामेनाऽवस्थापरिणामेन च वस्तु परिणतमिति व्यवह्रियते, अस्य चित्तस्य त्रिभेदः परिणामः सर्वत्र समुपन्नः।[316]

**धर्मपरिणामः** – अवस्थितस्य धर्मिणः पूर्वधर्मतिरोभावे सति धर्मान्तरस्य प्रादुर्भावः, यथा मृद्धर्मी पिण्डः स्वधर्माद्धर्मान्तरमुपसम्पद्यमानो धर्मतः परिणमते घटाकारः, तत्र पिण्डस्य

---

314 पातञ्जलयोगसूत्रम् 3/12

315 .योगदर्शनस्वामिनारायणभाष्यम् पृ. 270

316 योगदर्शनस्वामिनारायणभाष्यम् पृ. 271

धर्मस्य तिरोभावे सति घटत्वधर्मस्याऽऽविर्भाव:, एवमेव यावत्प्रकृतित्त्वं स्वस्वधर्मेण परिणमते पूर्वधर्मं विहाय धर्मान्तरमुपसम्पद्यते इति।[317]

**लक्षणपरिणाम:** – अवस्थितस्य धर्मस्याऽनागतादिलक्षणत्यागे वर्तमानादिलक्षणप्राप्ति:, स चाऽऽविर्भावतिरोभावशब्दवेद्य: यथा योगिनां सत्ख्यातिसिद्धान्ते यावतां पदार्थानां सत्स्वरूपतया यावद्वस्तुजातं त्रिकालवच्छिन्नं सदेव भवति तच्चाऽतीववर्तमानाऽनाग-तात्मकाललक्षणत्रयोपेतम् भवत्येव, तत्र यदा कारणत्मको घट: पिण्डेऽनागतस्वभाव स्वयमनागतस्वभावं विहायैवाऽऽविर्भवति तदा वर्तमानस्वभावो भवति,क्षणान्तरे च स एव वर्तमानस्वभावमपि विहायातीतस्वभाव:सन् तिरोभवतीति, स चायं भूतकाललक्षितो वर्तमानकाललक्षितो भविष्यत्काललक्षितश्चेति कालपरिणाम:, स एव लक्षणपरिणाम:।[1]

**अवस्थापरिणा:** – नवपुराणतादिपरिणाम:, घटोत्पमान: सन् क्षणमात्रं नव:, क्षणान्तरे पुराण:, एवं तत्तत्क्षणविशिष्टतया तु उत्तरोत्तरक्षणे नव: तदपेक्षया पूर्वपूर्वक्षणे पुराण:, एवं तत्तत्क्षणविशिष्टतया तु उत्तरोत्तक्षणे नव: तदपेक्षया पूर्वपूर्वक्षणे पुराणं भवति। वस्तुतस्तु धर्मिण: पदार्थस्य त्वेक एव परिणाम:, स च कदाचिद्धर्मद्वारक:, कदाचिल्लक्षणद्वारक:, कदाचिदवस्थाद्वारको भवति।[318]

अग्रिमे सूत्रेऽपि स्वामिनारायणभाष्ये चित्तवृत्तीनां शान्तोदितो धर्मी निरुपयन्ति।

---

[317] योगदर्शनस्वामिनारायणभाष्यम् पृ. 271

[318] योगदर्शनस्वामिनारायणभाष्यम् पृ. 271

## शान्तोदिताऽव्यपदेश्यधर्मानुपाती धर्मी।[319]

सा धर्मी त्रिविधा भवन्ति - शान्तधर्मावच्छिन्नः, उदितधर्मावच्छिन्नः, व्यपदेश्यधर्मावच्छिन्नश्च धर्मी। धर्मी नाम कार्यजननसामर्थ्यं कारणगताशक्तिः इति यावत् सा च तिरोभावप्रादुर्भावस्वभावा, यदाऽऽविर्भूय कार्यं सम्पाद्य च पुनस्तिरोभवति तदा कार्यमपि ध्वस्तमिति तिरोहितमिति सम्पद्यते, तदा तिरोभूता सा शक्तिः 'शान्ता' इति कथ्यते। यदा चाऽऽविर्भवति शक्तिस्तदा कार्यमपि द्रागेव कारणे समुत्पद्यते। तदानीं सा प्राविर्भावस्वभावा 'उदिता' इत्युच्यते। यावत्कालं सा नाऽऽविर्भवति तावन्न कार्यमपि जायते, अतः सा तिरोभावस्वभावा 'अव्यपदेश्या' इत्युच्यते। तथा च तादृशकारणगतशक्त्यनुपतनशीलं तादृशशक्त्यधीनं कार्यमेव शक्त्यधीनं सत् शान्तं भवति, यदा शक्तिरुदिता तदा कार्यमपि शक्त्यधीनं सद्-उदितं भवति, यदा च शक्तिरव्यपदेश्याऽनागतप्रादुर्भावा तदा कार्यमपि तच्छक्त्यधीनमव्यपदेश्यमनागतप्रादुर्भावं भवतीति। अत्र 'धर्मी' इति पदेन आविर्भावतिरोभावस्वभावो धर्मी अभिप्रेतः। आत्मा तु धर्मी अपि नेदृशो धर्मी, स तु तिरोभावप्राविर्भावादिरहितोऽतो नात्र लक्ष्यमिति। यदा तु परिणाम्यपरिणामधर्मिसाधारणं लक्षणं विधेयं तदा तु यत्किञ्चिद्धर्मनिष्ठकारतानिरूपिता या विशेष्यताख्यविषयता तदाश्रयत्वं धर्मित्वमिति परिष्करणीयम्, भवति हि घटत्वनिष्ठप्रकारतानिरूपिता या घटनिष्ठा विशेष्यताख्यविषयता तदाश्रयो घटो धर्मी इति।

---

[319] योगदर्शनस्वामिनारायणभाष्यम् पृ. 27।

अतः पुनः संशयति कथं एकस्य चित्तधर्मिणः अनेक परिणामः अस्मिन् विषयेऽपि श्रीकृष्णवल्लभाचार्यः प्रतिपादयन्ति यत् -

**क्रमान्यत्वं परिणामान्यत्वे हेतुः।**[320]

क्रमान्यत्वं-क्रमभेदः, परिणामान्यत्वे-परिणामभेदे, हेतुः-प्रयोजकः। तद्यथा-

मृच्चूर्णान्मृ-

त्पिण्डः ततः कपाले, ताभ्यां घट इति क्रमभेदः, इत्येवं सर्वत्र प्रकृतितत्त्वे कारणकार्यक्रमो विद्यत एव, अतः सरूपपरिणामो विरूपपरिणामो वाऽवश्यंभावी। सर्वेषां चित्तादीनां परिणममानानां केचिद्धर्माः सुखादयः प्रत्यक्षेणैवोपलभ्यन्ते, केचिच्च धर्मसंस्कारशक्तिप्रभृतयस्तु अनुमानेन गम्या भवन्ति, तत्र सर्वविधधर्मेषु चित्तमेकमेवाऽपि भवत्यन्वितं भिन्नरूपतया, अतश्चितं परिणामीति सिद्धम्, तथा सर्वत्र बोध्यं क्रमान्यत्वात् परिणामान्यत्वमिति। तत्र धर्मपरिणामान्यत्वे धर्मक्रमान्यत्वं हेतुः, यो यस्य धर्मस्य समनन्तरो धर्म स तस्य धर्मस्य क्रमः, पिण्डः प्रच्यवते घट उपजायते इति धर्मपरिणामक्रमः। एवं लक्षणपरिणामान्यत्वे लक्षणक्रमान्यत्वं हेतुः, यथा अतीतकालः, वर्तमानकाल इति लक्षणक्रमः, अतीतस्वभावो घटस्तिरोहितः, वर्तमानस्वभावो घटः प्रादुर्भूत इति लक्षणपरिणामक्रमः। एवम् अवस्थापरिणामान्यत्वेऽवस्थाक्रमान्यत्वं हेतुः, यथा उत्पत्तिप्रतियोगी घटः

---

[320] योगदर्शनस्वामिनारायणभाष्यम् पृ. 272

स्थितिप्रतियोगी घट इत्यवस्थाक्रमः, तेन नूतनो घटः पुराणो घट इत्यवस्थापरिणाक्रमः। अनेन प्रकारेण चित्तस्य एकाग्रता परिणामः निरुपिता।

व्यासभाष्ये चित्तस्यैकाग्रता विषये प्रतिपादितम् यत् समाधिऽवस्थां प्राप्तं चित्तस्य पूर्वप्रत्ययं शान्तं जातं अपरं च उदितमभवत्, चित्ते उभयोः प्रत्ययोः एकसदृशं भवेत् तथा समाहितं चित्तं उभाभ्यां प्रत्ययाभ्यां युक्तो भूत्वा पुनः यदा समाधिः पूर्ण भवति, तावत् पर्यन्तं तस्यामेव स्थित्यां योगी स्थितो भवति। धर्मीचित्तस्य अयं परिणामः एकाग्रता परिणामः कथ्यते।

**समाहितचित्तस्य पूर्वप्रत्ययः शान्तः उत्तरस्तसदृशः उदितः, समाधिचित्तभयोरनुगतम् पुनस्तथैव, आ समाधिभ्रेषादिति, स खल्वयं धर्मिणः चित्तस्यैकाग्रता परिणामः।**[321]

भोजवृत्तेऽपि चित्तस्य एकाग्रता विषये कथितमस्ति **समाहितस्यैव चित्तस्यैकप्रत्ययो वृत्तिविशेषः शान्तोऽतीतमध्वानं प्रविष्टः। अपरस्तूदितो वर्तमानेऽध्वनि स्फुरितः। द्वावपि समाहितचित्तत्वने तुल्यावेकरूपालम्बनत्वेन सदृशो· प्रत्ययावुभयत्रापि समाहितस्यैव चित्तस्यान्वयित्वेनावस्थानमिति, एकाग्रतापरिणाम उच्यते।**[322]

योगसिद्धान्तचन्द्रिकायां उक्तमस्ति चित्तस्य एकाग्रता विषये - **सर्वार्थताया निःशेषतः क्षये सति शान्तोदितौ, शान्तः अतीताध्वनि प्रविष्टः, उदितो**

---

[321] व्यासभाष्यम् पृ. 216

[322] भोजवृत्तिः पृ. 196

**वर्तमानेऽध्वनि स्फुरितः, द्वावतीतोत्पद्यमानो तुल्यप्रत्ययौ एकवस्तुविषयकत्वेन सदृशो प्रत्ययो चित्तस्यैकाग्रताकालीनः पुनः परिणामो भवति। सजातीय एकैकः प्रत्ययो नश्यति, अन्योऽन्यश्चोत्पद्यत इत्येवं परिणामो भवतीत्यर्थः। न च पूर्वेण गतार्थता तत्र चित्तसमाधानरूपलक्षणपरिणामस्यैवोक्तत्वात्। अत्र तु धारावाहिकैकाग्रता सन्तानस्योक्तेर्न गतार्थतेति।**[323]

इत्थं सर्वासु मणिप्रभाः, नागोजीभटः, तत्त्ववैशारदी, योगवार्तिकं टीकासु एकाग्रता परिणामः प्राप्यते तत् सर्व संक्षिप्तेन मयाऽत्र प्रतिपाद्यतेति शम्।

---

[323] योगसिद्धान्तचन्द्रिका पृ. 139

**अनागतज्ञानस्य प्रयोजकत्वविमर्शः।**

स्वामिनारायणभाष्यमाश्रित्य परिणामत्रय संयमात् फलम् -

**परिणामत्रयसंयमादतीताऽनागतज्ञानम्।**[324]

अत्र भाष्ये लिखितमस्ति धर्मलक्षणाऽवस्थाख्येषु संयमाद् अतीताऽनागतं ज्ञानं योगिनो भवति, अत्र धर्मलक्षणाऽवस्थानां उपस्थापनं पूर्वमेव करणीयम् अनिवार्यम्। तत्र कोऽयं धर्मपरिणामः - अवस्थितस्य धर्मिणः पूर्वधर्मतिरोभावे सति धर्मान्तरस्य प्रादुर्भावः, यथा मृद्धर्मी पिण्डः धर्मतः परिणमते घटाकारो भवति, पिण्डस्य तिरोभावे सति घटत्वधर्मस्याऽऽविर्भावो दृश्यते। कथनस्यास्यतात्पर्यमिदमस्ति सर्वं स्वस्वधर्मेण परिणमते पूर्वधर्मं विहाय धर्मानन्तरमुपसम्पद्यते।

लक्षणपरिणामः - लक्षणपरिणामः विषये शास्त्रकारः कथयति - अवस्थितस्य धर्मस्याऽनागतादिलक्षणत्यागे वर्तमाने प्राप्तिः यावतां पदार्थानां सत्स्वरूपतयां यावद्वस्तुजातं त्रिकालवच्छिनं सदैव भवति स चाऽऽवयं वस्तुं भूतकाललक्षितो वर्तमानलक्षितो भविष्यत्काललक्षितश्चेति कालपरिणामः , स एव लक्षणपरिणामः।

अवस्थापरिणामः - अवस्थापरिणाम नाम नवपुराणतादिपरिणामः, घट उत्पद्यमानः सन् क्षणमात्रं नव, क्षणान्तरे पुराणः, वस्तुतस्तु धर्मिणः पदार्थस्य त्वेक एव परिणामः इति अवस्थापरिणामः बोध्यम्।

---

[324] योगदर्शनस्वामिनारायणभाष्यम् 3/16

अत्रापि त्रयमेकत्र संयमेन योगी अतीताऽगतवस्तुं साक्षात् क्रियते। योगी यदा वर्तमाने यत्र कुत्रापि वस्तुनि धारणाध्यानसमाध्यात्मकं संयमं करोति तदा तद्वस्तुनः अतीतधर्मलक्षणाऽवस्थाविषयं भविष्यद्धर्मलक्षणावस्थाविषयकं च ज्ञानमुत्पद्यते, भूतकाले कीदृशं तदासीद् भविष्यत्काले च कीदृशं भावीति सर्वमपि जानाति, यत्र यत्र तत्त्वादौ संयमं करोति तत्र तत्र त्रिकालस्थितिविषयकं ज्ञानं भवतीति, तेन संयमेन योगी अतीताऽनागतं ज्ञानं लभते। अनेन ब्रह्माण्डे यावतां पदार्थानां जन्मस्थितिज्ञानं सम्पद्यते, अनन्तरं सर्वभूतरुतज्ञानमपि प्राप्नोति योगी।